**दिनाङ्क :- 15.05.2026**

**प्रात: - 06:55**

## <u>प्रधानमन्त्री-यूएई यात्रा</u>

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्यारभ्य यूएई, नेदरलैण्ड्, स्वीडेन्, नॉर्वे, इटलीति देशानां षड्दिवसीय-यात्रायां भविष्यति । पञ्च-देश-यात्रायाः प्रथमपदे अद्य श्रीमोदी यूएई-देशं गमिष्यति, यत्र सः, राष्ट्रपतिना शेख-मोहम्मद-बिन् जायद-अल्-नह्यान्-इत्यनेन सह मिलिष्यति । द्विपक्षीयविषयेषु, विशेषतः ऊर्जासहकार्ये, तथैव परस्परहितस्य क्षेत्रीय-अन्ताराष्ट्रिय-विषयेषु च द्वौ नेतारौ विचाराणां आदान-प्रदानं करिष्यतः । मेलनमिदं ऊर्जासुरक्षा-विषये केन्द्रीकृतं भविष्यति इत्यपेक्षा वर्तते ।

## <u>ब्रिक्स विदेशमन्त्री मेलनम</u>

प्रधानमन्त्रिणा श्रीमोदिना प्रोक्तं यत् अस्मिन् वर्षे भारतस्य अध्यक्षतायाम्, ब्रिक्स्-इति बहुदेशीयसंघः, बहुपक्षीयतां सुदृढं कर्तुं, सततविकासं प्रवर्धयितुं, आर्थिक-शक्तिं वर्धयितुं, अधिक-समावेशीय-विश्वव्यवस्थायाः निर्माणार्थं च मिलित्वा कार्यं करिष्यति । ह्यः नवदिल्ल्यां ब्रिक्सदेशानां विदेशमन्त्रिभिः प्रतिनिधि-मण्डल-प्रमुखैः सह संवादं कुर्वन्, श्रीमोदी अवदत् यत् उदयमानानाम् अर्थव्यवस्थानां मध्ये सहकार्यं प्रवर्तयितुं वैश्विकदक्षिणस्य आकांक्षाणां विकासाय च ब्रिक्स-संघः महत्त्वपूर्णमञ्चरूपेण उद्भूतः अस्ति ।

**अन्तरमन्त्रालयस्य विवरणम्**

केन्द्रसर्वकारेण उक्तं यत् देशे पर्याप्तं असंस्करित-तैलस्य, एलपीजी इति द्रवीकृत-अनिल-ईन्धनस्य, प्राकृतिक-अनिलेन्धनस्य च उपलब्धतां सुनिश्चेतुं प्रभावीपदानि गृहीतानि सन्ति । ह्यः नवदिल्ल्याम्, अन्तरमन्त्रालयस्य वृत्तान्तस्य समये पेट्रोलियम-प्राकृतिक-अनिल-मन्त्रालयस्य संयुक्तसचिव-पदासीना सुजाता शर्मा अवदत् यत् देशे सर्वत्र गृहोपयोगी- एलपीजी इति द्रवीकृत-अनिल-ईन्धनस्य आपूर्तिः सुचारुरूपेण प्रचलति ।

**प्रधान-नीट-मेलनम्**

नीट इति आगामि-राष्ट्रिय-पात्रता-सहित-प्रवेशपरीक्षायाः सज्जतायाः समीक्षां कर्तुं केन्द्रीय-शिक्षामन्त्री धर्मेन्द्रप्रधानस्य निवासस्थाने उच्चस्तरीय सभा आयोजिता । सभायां नीटपरीक्षायाः सुचारुतया कुशलतया च संचालनस्य विविधपक्षेषु विस्तृतविमर्शाः कृताः।

सभायां उच्चशिक्षासचिवः, विद्यालयशिक्षासचिवः, एनटीए इति राष्ट्रियपरीक्षण-संस्थायाः महानिदेशकः, सीबीएसई इत्यस्य अध्यक्षः अन्ये च वरिष्ठाधिकारिणः उपस्थिताः आसन् ।

**राजनाथ सिंह-आन्ध्रप्रदेशः**

रक्षा मंत्री राजनाथ सिंहः अद्य आन्ध्रप्रदेशस्य श्रीसत्य-साई-मण्डलस्य पुट्टपार्थि इत्यत्र अनेक-वैमानिक-रक्षा-परियोजनानाम् आधारशिलास्थापन-

कार्यक्रमे भागं गृहीष्यति । रक्षामन्त्रालयेन उक्तं यत् विमान-विकास-संस्थायाः विमान-समायोजनस्य उड्डयन-परीक्षण-केन्द्रस्य च शिलान्यासः भविष्यति । विमानस्य एकीकरणस्य, परीक्षणस्य, प्रमाणीकरणस्य च एषा परियोजना उन्नत-मध्यम-युद्ध-विमान-कार्यस्य विकासं त्वरयिष्यति ।

## शिवराज सिंह

केन्द्रीय ग्रामीण विकास मंत्री शिवराज सिंह चौहान अद्य महाराष्ट्रस्य सतारा इत्यत्र प्रधानमंत्री ग्रामीण आवास योजनायाः लाभार्थी-सम्मेलने एवं महाराष्ट्र-आवास-अभियान-राज्य-स्तरीय-पुरस्कार-वितरण-समारोहे च भागं गृहीष्यति ।

## उत्तरप्रदेशः

उत्तरप्रदेशे विगत षट्त्रिंशत् होरासु झंझावात-चक्रवात-विद्युत्पातादिभिः सह अतिवृष्टि-कारणात् न्यूनातिन्यूनम् एकादशोत्तर एकशतं जनाः मृताः, द्विशताधिकाः जनाः व्रणिताः सन्ति । मुख्यमन्त्री योगी आदित्यनाथः जिलाधिकारीम्, तथा सम्बन्धित-अधिकारिणः शीघ्रतया घटनास्थलं गत्वा सर्वेक्षणं कर्तुं निर्देशं दत्तवान् ।

## मौङ्गरी मेला

उधमपुर-मण्डलस्य शिवपार्वतीतीर्थे ऐतिहासिकः त्रि-दिवसीया शिवपार्वतीमेला इति प्रसिद्धा वार्षिक-मौङ्गरीमेला अद्य आरभ्यते। धार्मिकोत्साहस्य उत्सवस्य च

भावनायाः मध्ये उधमपुरजिल्ला-मण्डल-प्रशासनेन मौङ्गरी इत्यस्य 'सर-दब्बर' क्षेत्रे भव्य-ऐतिहासिक-मेलायाः सज्जता कृता अस्ति ।

**<u>सुवर्णायातः</u>**

केन्द्रसर्वकारेण सुवर्णस्य आयातस्य कृते शतम्-किलोग्राम-परिमितस्य सीमायाः निर्धारणं कृतम् अस्ति। अग्रिम-प्राधिकरण-योजनायाः अन्तर्गतं, आभूषणनिर्यातकाः शून्यशुल्केन असंस्करित-वस्तूनां अथवा निवेशसामग्रीणां आयातं कर्तुं शक्नुवन्ति ।

**<u>निर्वाचन-आयोगः</u>**

निर्वाचन-आयोगेन घोषणा कृता यत् विशेष-सघन-पुनरीक्षणस्य SIR इत्यस्य तृतीयचरणं षोडश राज्येषु त्रयेषु च केन्द्रीय-प्रदेशेषु चरणबद्धरूपेण संचालितं भविष्यति।

**<u>आईपीएल</u>**

आई.पी.एल. इति विंशतिम्-प्रतिविंशतिः क्रिकेट्-लीग-प्रतिस्पर्धायां, गतरात्रौ, मुम्बई इण्डियन्स् दलेन, पंजाब किंग्स दलं षट्स्तोभकैः पराजितम् । अद्य सायं सार्धसप्तवादने, लखनऊ सूपर जायण्ट्स् दलं, लखनौनगरे, चेन्नई सूपर् किंग्स् दलं, सम्मुखीकरिष्यति ।